श्रीमते रामानुजाय नमः

# ।। धाटीपञ्चकम् ।।

पादुके यतिराजस्य कथयन्ति यदाख्यया
तस्य दाशरथेः पादौ शिरसा धारयाम्यहम् ।।

पाषंडद्रुमषंड दावदहनश्चार्वाकशैलाशनिः
बौद्धध्वांतनिरास वासरपतिर्जैनेभकंठीरवः
मायावादिभुजंगभंग गरुडस्त्रैविद्यचूडामणिः
श्रीरंगेशजयध्वजो विजयते रामानुजोऽयं मुनिः ।।१।।
पाषंडषंडगिरिखंडनवज्रदंडाः
प्रच्छन्नबौद्ध मकरालयमंथदंडाः
वेदांतसार सुखदर्शनदीपदंडाः
रामानुजस्य विलसंति मुनेस्त्रिदंडाः ।।२।।
चारित्रोद्धारदंडं चतुरनयपथालंक्रियाकेतुदंडं
सद्विद्यादीपदंडं सकलकलिकथासंहतेःकालदंडं
त्रय्यंतालम्बदंडं त्रिभुवनविजय छत्रसौवर्णदंडं
धत्ते रामानुजार्यः प्रतिकथकशिरोवज्रदंडं त्रिदंडं ।।३।।
त्रय्यामांगल्यसूत्रं त्रियुगयुगपदारोहणालंबसूत्रं
सद्विद्यादीपसूत्रं सगुणनयविदां संपदां हारसूत्रं
प्रज्ञासूत्रं बुधानां प्रशमधनमनःपद्मिनीनाळसूत्रं
रक्षासूत्रं मुनीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रं ।।४।।
पाषंडसागर महाबडबामुखाग्निः
श्रीरंगराज चरणांबुज मूलदासः
श्रीविष्णुलोक मणिमंडप मार्गदायी
रामानुजो विजयते यतिराजराजः ।।५।।

।।धाटीपञ्चकम्।।

मंडयं नायक रामानुजः